# नवमः अभ्यासः

# रचनात्मककार्यम्

## (क) चित्रवर्णनम्

♦ चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन वाक्यानि रचयत –

1.



**मञ्जूषा**

होलिकापर्व, वर्णाः, आनन्दम्, गृहाणि, जलम्, द्रोणी, मार्गः, क्षिपति, विभिन्नाः, बालकौ, वर्णक्षेपणी, बालिका, वर्णोत्सवः।


2.



**मञ्जूषा**

छत्रविक्रेता, समीकरोति, आपणिकः, रक्तछत्रम्, बालिका, विद्यालयस्य, वेशभूषा, वृक्षाः, पश्यति, ग्राहकः।

3.



**मञ्जूषा**

परिवारः, कुक्कुरः, फलानि, सहभोजम्, माता, पिता, उद्यानविहाराय, पुत्रः, पुत्री, वृक्षाः, देवालयः, जनाः, उपविश्य, कुर्वन्ति।

4.



**मञ्जूषा**

बालकाः, वृक्षारोपणम्, कुर्वन्ति, पादपम्, जलपात्रेण, सिञ्चति, पर्यावरणम्, शुद्धम्, खनित्रम्, हरीतिमा, पुष्पाधानी, विद्यालये, बालकः, वृक्षौ।

5.



**मञ्जूषा**

बसस्थानकम्, भारवाहकः, बसयानानि, जनाः, प्रतीक्षाम्, तिष्ठति, समाचारपत्रम्, कुर्वन्ति, परिवारः, यानपेटिका, अवकरपात्रम्, यात्रा।

6.



**मञ्जूषा**

चायविक्रेता, बालकः, जनः, तिष्ठति, वृक्षाः, समाचारपत्रम्, पठति, विक्रीणीते, चल-आपणः, सुपिष्टकानि, अवकरपात्रम्।

7.



**मञ्जूषा**

वन्यजीवनम्, चित्रोष्ट्रः, भल्लूकः, गजः, गजशावकः, पिबति, नदी, हरीतिमा, वृक्षाः, सुन्दरं दृश्यम्, मृगः, जलम्।

8.



**मञ्जूषा**

तरन्ति, उद्यानस्य, मित्रैः, एका, स्तः, चत्वारः, शाटिकाम्, कोणे, दम्पती, जलाशयः।

9.



मञ्जूषा

| |
|---|
| प्रसीदति, दत्तचित्तः, आदर्शः, पितुः, चरणस्पर्शम्, कपाटिकायाम्, उपरि, ददाति, पुस्तकानि, भित्तौ, चित्रम्, पुष्पाधानी, आशीर्वादम्। |

10.



मञ्जूषा

| |
|---|
| रक्षणीयम्, अन्ये, क्षिपति, सह, अवशिष्टः, अङ्कितम्, माता, वाहनम्, धूमः, जीवनम्, प्राणवायुः, बालकः, कर्तिताः वृक्षाः, पर्यावरणम्। |

11.



मञ्जूषा

| |
|---|
| दर्दुराः, वर्षा-ऋतौ, गृहीत्वा, मेघाच्छन्नम्, धारयति, कर्गदनौकाः, उपविष्टाः, आतपत्रम्। |

12.



मञ्जूषा

| |
|---|
| नदी, जनः, स्नानम्, तटे, वृक्षे, नृत्यति, चित्रे, शुकः, अनेके, पक्षिपरिषद्, खगाः, कूजन्ति, काकः, मयूरः, चर्चयन्ति। |

## ( ख ) अनुच्छेदलेखनम्

♦ **मञ्जूषातः पदानि विचित्य अधः प्रदत्तान् विषयान् आधृत्य अनुच्छेदं लिखत।**

### 1. जलस्य महत्त्वम्

जलम्, क्षेत्राणाम्, विना, जीवने, स्नानाय, भोजनस्य, अस्माभिः, महत्त्वपूर्णम्, कर्तुम्, क्षालनाय, दूषितेन, जायन्ते।

### 2. मम मातृभूमिः

अस्माभिः, पोषणम्, स्वर्गादपि, येन-केन-प्रकारेण, सत्यम्, मातृभूमिः, अहम्, माता, यच्छति, वन्दनीया।

### 3. मम जननी

चतुर्वादने, एकाकी, प्रतिवेशिनाम्, स्निह्यति, महिला, विज्ञानस्य, परिश्रमी, मयि, करोति, अस्मि, अध्यापयति।

### 4. मम जीवनस्य उद्देश्यम्

प्रसिद्धसङ्गीतगायकस्य, अहम्, पञ्चवर्षीयः, रोचते, इच्छामि, सङ्गीतश्रवणे, मह्यम्, आरब्धम्, स्वगुरुम्, सङ्गीतशिक्षकरूपे, भैरवीरागः।

### 5. प्रातः-भ्रमणम्

रुग्णः, वर्धते, व्यायामः, अहम्, चतुर्दशवर्षीयः, एकः, प्रातः-भ्रमणेन, मया, एकस्मिन्, चत्वारि।

### 6. अनुशासनम्

आवश्यकम्, जीवने, नियमपालनम्, सर्वेभ्यः, सर्वत्र, विकासः, साफल्यम्, शीलः, प्रत्येकम्।

### 7. परोपकारः

परेषाम्, उपकारः, धनेन, दानेन, सर्वेषाम्, प्राणिनाम्, कर्तव्यम्, हितम्, भवति, प्रकृतिः।

### 8. सत्सङ्गतिः

सताम्, सर्वम्, ददाति, हिताय, योजयते, सङ्गः, उन्नतिः, सत्सङ्गत्या, प्रभावः, नित्यम्, अद्भुतम्।

### 9. शिक्षा

सर्वेषाम्, मानवानाम्, अधिकारः, कर्तव्यानि, साक्षरताम्, विवेकः, विकासम्, करोति, पशुमानवेषु, भेदम्, जनयति।

## ( ग ) पत्रलेखनम्

1. **सुकन्या कोलकातानगरे छात्रावासे निवसति। सा विद्यालयतः शैक्षिकभ्रमणाय भुवनेश्वरं गन्तुम् इच्छति। एतदर्थम् अनुमतिं राशिं च प्राप्तुं सा नवदिल्लीस्थं पितरं प्रति पत्रम् एकं लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु।**

छात्रावासः,

राजकीयः विद्यालयः

(i) ................................ ।

तिथिः 25-02-2025

माननीयाः पितृवर्याः !

सादरं प्रणमामि।

भवतः पत्रं प्राप्तम्। मम (ii) ........................ परीक्षा समाप्ता। परीक्षापत्राणि अतिशोभनानि जातानि। यावत् परीक्षापरिणामः न आगच्छति तावत् आगामिमासस्य प्रथमसप्ताहे (iii) ........................ विद्यालयस्य अध्यापिकाः अस्मान् शैक्षिकभ्रमणाय (iv) ........................ नेष्यन्ति। अहम् अपि ताभिः (v) ........................ गन्तुम् इच्छामि। एतदर्थं मया कक्षाध्यापिकायै (vi) ........................ रूप्यकाणि दातव्यानि सन्ति। अतः यदि अनुमतिः (vii) ........................ तर्हि अहम् अपि गच्छेयम्। ज्ञानवर्धनार्थम् एतत् अतिरिच्य अवसरं न पश्यामि। अतः कृपया उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु।

सर्वेभ्यः मम (viii) ........................ निवेदनीयाः।

भवतां प्रिया (ix) ....................

सुकन्या

पत्रवेष्टनम्।

सविधे

श्री प्रणवभट्टाचार्यः,

26, चितरञ्जनपार्कः,

नवदिल्ली (x) ........................

**मञ्जूषा**

प्रणामाः, सह, कोलकातातः, स्यात्, पञ्चसहस्रम्, 110019, भुवनेश्वरम्, प्रथमसत्रीया, मम, पुत्री।

2. **सौम्या दिल्ली नगरे वसति। तस्याः सखी सुमतिः असमप्रदेशे वसति। सौम्यया गणतन्त्रदिवसस्य शोभायात्रायां भागः गृहीतः। सा स्वानुभवान् स्वमित्रं सुमतिं प्रति पत्रे लिखति। मञ्जूषातः पदानि विचित्य पत्रं पूरयन्तु।**

ए-14, वसन्तविहारः

नवदिल्लीतः

तिथिः ................................

प्रियसखि सुमते,

(i) .........................

अत्र कुशलं तत्रास्तु। अहं (ii) ......................... सज्जायां व्यस्ता आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं लिखामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः (iii) ......................... । अस्माकं विद्यालयस्य (iv) ......................... राजपथे स्वकलायाः प्रदर्शनम् अकरोत्। अहं गरबानृत्यस्य (v) ................................ आसम्। छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः (vi) .........................गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि, विचित्रवर्णानि परिदृश्यानि (vii) ................................ च दृष्ट्वा अहं गौरवान्विता अस्मि। (viii) ......................... बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। (ix) ............................... वन्दनीयौ।

भवत्याः (x) ..........................

सौम्या

आवरणम्

| सविधे |
|---|
| सुश्री सुमतिः |
| 98, भवतारमार्गः |
| असमप्रदेशः-533277 |

**मञ्जूषा**

| पितरौ, गृहीतः, नमस्ते, मम, सखी, राजपथम्, वाद्यवृन्दम्, लोकनृत्यानि, गणतन्त्रदिवससमारोहस्य, प्रमुख-सञ्चालिका। |
|---|

**3.** **सुजाता दिल्लीमहानगरे वसति। तस्याः सखी दिव्यामहादेवन् चेन्नईनगरे निवति। सुजातायाः विद्यालये पर्यावरणविषये एका गोष्ठी जाता। गोष्ठीं वर्णयन्ती सुजाता दिव्यायै पत्रम् एकं लिखति। मञ्जूषातः समुचितपदानि चित्वा पत्रं पूरयन्तु।**

20, वसन्तविहारः,

नवदिल्लीतः।

तिथिः 20-5-2025

(i) ........................ दिव्ये!

सस्नेहं नमस्ते।

ह्यः अस्माकं विद्यालये (ii) ........................ एका महत्त्वपूर्णा गोष्ठी अभवत्। तत्र महानगरेषु वर्धमानं प्रदूषणं दृष्ट्वा पर्यावरणस्य (ii) ........................ उपायानां विषये चर्चा अभवत्। गोष्ठ्यां वक्तॄणां विचारसारः आसीत् यत् गृहात् बहिः, (iv) ........................ रथ्यासु च अवकरः न क्षेपणीयः। (v) ........................ समये समये जलशुद्धिः करणीया। मार्गेषु, उद्यानेषु विद्यालयेषु च अधिकाधिकं (vi) ........................ आरोपणीयाः। जनजागरणार्थं "वृक्षो रक्षति रक्षितः", "जलम् एव जीवनम्" एतादृशानि महावाक्यानि पट्टिकासु लिखित्वा यत्र तत्र (vii) ................। ध्वनिप्रदूषणं निवारयितुं ध्वनिप्रसारकयन्त्राणां (viii) ........................ प्रयोगः करणीयः। अस्मिन् विषये भवत्याः विद्यालये किं किं भवति इति मां विस्तरेण लिखतु।

पितरौ वन्दनीयौ।

भवत्याः सखी,

(ix) ................................।

आवरणम्

| |
|---|
| सविधे |
| सुश्री (x) ................................ |
| 52, मरयापट्टी |
| चेन्नई-641008 |

**मञ्जूषा**

| |
|---|
| सुजाता, नदीजलेषु, स्नेहस्निग्धे, पर्यावरणविषये, न्यूनतमः, वृक्षाः, रक्षणाय, दिव्यामहादेवन्, टङ्कनीयानि, जलप्रदूषण-निवारणाय। |

4. **विकासः नैनीतालस्थे एकस्मिन् विद्यालये पठति। सः छात्रावासात् अमेरिका-वास्तव्यं मित्रं जोसेफं नैनीतालविषये पत्रम् एकं लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु।**

छात्रावासः

(i) ........................

तिथिः ........................

प्रिय (ii) ........................ जोसेफ!

(iii) ........................ ।

गतमासे आवयोः दूरभाषेण वार्तालापः अभवत्। (iv) ........................ एव अत्र हिमपातः आरभत। तं द्रष्टुम् अनेके यात्रिणः दूरतः आगताः आसन्। नैनीसरः अत्र एकं विशेषम् आकर्षणस्थलम् अस्ति, तस्य अपि जलं (v) ........................ आसीत्। तदा तत्र नौकाविहारः तु सम्भवः नासीत् किन्तु (vi) ........................ आनन्दिताः आसन्। भयङ्करे शीतेऽपि यात्रिणः 'चाइना-पीक' इति स्थानं द्रष्टुं गताः आसन्। अत्रत्यानि प्राकृतिकदृश्यानि आकर्षकाणि मनोरमाणि च सन्ति।

यात्रिणां समूहं (vii) ........................ स्थानीयाः आपणिकाः प्रमुदिताः आसन्। यात्रिनिवासालयेषु आवासः दुर्लभः अभवत्। निवासाय (viii) ........................ भाटकं प्रवृद्धम् आसीत्। अहम् इच्छामि यत् ईदृशे अवसरे भवान् अपि भारतम् आगच्छेत् पर्वतीयस्थलस्य च आनन्दम् (ix) ........................ ।

अग्रिमे दिसम्बरमासे जनवरीमासे वा भवान् अत्र आगमिष्यति इति मे हार्दिकी कामना।

सधन्यवादम्।

(x) ........................ मित्रम्

आवरणम्

सविधे

श्री जोसेफ,

2200, पाइनहर्स्टसर्कलः,

जिरारड, ओहायो-44420 अमेरिका।

**मञ्जूषा**

| भवताम्, दृष्ट्वा, नैनीतालम्, अनुभवेत्, मित्र, प्रकोष्ठानाम्, हिमीभूतम्, नमो नमः, दिनद्वयानन्तरम्, स्केटिंगप्रेमिणः। |
| --- |

**5. भवतः नाम अधोक्षजः। भवतः परीक्षा समाप्ता अधुना भवान् किञ्चित् विशिष्टं कर्तुम् इच्छति अतः पितुः अनुमतिं प्राप्तुम् अधोलिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु–**

रणवीरच्छात्रावासः,

वाराणसीतः

दिनाङ्कः ..........................

पूज्याः पितृचरणाः!

साष्टाङ्गं प्रणमामि।

अहमत्र (i) .............................. कुशली सन् भवतां कुशलतां भगवन्तं विश्वनाथं प्रार्थये। साम्प्रतम् अहं (ii) .......................... वाञ्छामि यत् मम वार्षिकी परीक्षा मार्चमासस्य (iii) .......................... दिनाङ्के सम्पन्ना भविष्यति। अग्रिमायै कक्षायै पुनर्नामाङ्कनं जूनमासे भविष्यति। (iv) .......................... पश्चात् मम समीपे मासत्रयस्य समयः अस्ति। तस्य मासत्रयस्य समयस्य (v) .......................... वेदाध्ययनं कर्तुं वाञ्छामि। अतः भवताम् अनुमत्या सह अम्बायाः अपि (vi) .......................... वाञ्छामि। यतोहि आधुनिकविषयाणां (vii) .......................... सह भारतीयज्ञानस्य अपि अनिवार्यताम् अनुभवामि तच्च (viii) .......................... विना न सम्भवति। विशेषाधिकम् गृहागमन–पश्चात् (ix) .......................... । पौनः पुन्येन सर्वेभ्यः ज्येष्ठेभ्यः सादरं प्रणामाञ्जलिं समर्पयन् भवताम् उत्तरस्य (x) .......................... अस्मि।

भवतां पुत्रः

अधोक्षजः

**मञ्जूषा**

| |
|---|
| प्रतीक्षायाम्, ज्ञानेन, अनुमतिम्, परीक्षायाः, सूचयितुम्, छात्रावासे, अष्टादशे, सदुपयोगाय, वेदाध्ययनम्, चर्चयिष्यामः। |

**6. भवान् ब्रह्मा एकादश्याः कक्षायाः छात्रः अस्ति। भवान् विज्ञानविषयेण सह संस्कृतविषयं पठितुम् इच्छति। तदर्थं प्रधानाचार्याय लिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु–**

दिनाङ्कः ..........................

सेवायाम्

(i) ..........................

विष्णुदत्त–वरिष्ठमाध्यमिक–विद्यालयः,

इन्द्रप्रस्थः।

विषयः – संस्कृतविषयस्य (ii) .......................... सन्दर्भे प्रार्थनापत्रम्।

महोदय!

अहं भवतः (iii) .......................... एकादश्याः कक्षायाः विज्ञानसमूहस्य (iv) .......................... अस्मि। अहं विज्ञानविषयेण सह (v) .......................... अपि पठितुम् इच्छामि यतोहि संस्कृते बहवः (vi) .......................... अंशाः सन्ति। तान् अंशान् ज्ञातुं संस्कृतस्य (vii) .......................... आवश्यकम् अस्ति। संस्कृतस्य मूलज्ञानं विना तस्य (viii) .......................... अवगमनं क्लेशकरम् अस्ति इति भावयामि।

अतः सविनयं (ix) .......................... यत् मह्यं संस्कृतविषयं प्रदाय माम् अनुगृह्णातु भवान्।

सधन्यवादम्

भवदीय: छात्र:,

(x) ........................

कक्षा – एकादशी 'अ'

अनुक्रमाङ्क: – 16

**मञ्जूषा**

| |
|---|
| संस्कृतविषयम्, वैज्ञानिका:, ज्ञानम्, विद्यालये, छात्र:, तत्त्वस्य, निवेदयामि, प्रधानाचार्यमहोदय:, ब्रह्मा, चयनस्य। |

**7. भवान् सङ्गमविहारक्षेत्रस्य निवासी अस्ति। भवान् स्वनगरस्य स्वच्छतां कारयितुम् इच्छति। तदर्थं नगर-निगमाधिकारि-महोदयाय लिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु –**

सेवायाम्,

नगरनिगमधिकारि-महोदय:,

(i) ........................, दिल्ली।

विषय: – वीथिकासु स्वच्छताया: सन्दर्भे (ii) ........................

मान्यवर!

अहं सङ्गमविहारक्षेत्रस्य (iii) .................... अस्मि। अत: सूचयितुं वाञ्छामि यत् अद्यत्वे (iv) ..................... सर्वत्र अवकराणां राशि: अधिक: दृश्यते। तानि अवकराणि निगलितानि भूत्वा (v) ........................ जायमानानि सन्ति। अनेन सङ्क्रमणस्य (vi) ........................ अत्यधिका अस्ति। केचन जना: अत्र (vii) ........................ अपि जाता: सन्ति। परम् अवकरम् अपसारयितुं कापि व्यवस्था न दृश्यते। (viii) ........................ अपि बहुभ्य: दिनेभ्य: न आगतम् अस्ति।

अत: प्रार्थयामि यत् अस्माकं वीथिकानां (ix) .............................. समुचितां व्यवस्थां कारयित्वा सर्वान् नगरवासिन: (x) ........................ रक्षतु इति।

सधन्यवादम्

भवदीय:

नगरवासी

**मञ्जूषा**

| |
|---|
| आशङ्का, रुग्णा:, अवकरवाहनम्, स्वच्छतायै, रोगेभ्य:, सङ्गमविहारम्, आवेदनपत्रम्, निवासी, वीथिकासु, दुर्गन्ध-युक्तानि। |

## ( घ ) संवादलेखनम्

### 1. गृञ्जनलाभाः

**निम्नलिखितसंवादेषु मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु।**

**शाकविक्रेत्री** – स्वीकरोतु। स्वीकरोतु। स्वास्थ्यवर्धकानि रक्तवर्णानि कोमलानि गृञ्जनकानि। एतानि पित्तं शमयन्ति। रक्तं वर्धयन्ति च।

**सुरभिः** – अयि त्वम् ...................... असि?

**शाकविक्रेत्री** – मया तु गुणाः अपि वर्णनीयाः एव। यतोहि अहम् प्राकृतिकचिकित्साम् अपठम्।

**सुरभिः** – शोभनम्। गृञ्जनकानां ......................किम्?

**शाकविक्रेत्री** – मूल्यम्? एकवारम् एव वदामि। पञ्चाशत्रूप्यकैः किलोमितानि।

**सुरभिः** – अधिकं ननु, ...................... करोतु।

**शाकविक्रेत्री** – त्रिंशत् रूप्यकाणि? नैव? त्वं तु विना मूल्येन एव वाञ्छसि किल।

**सुरभिः** – अस्तु। क्रोधं मास्तु, चत्वारिंशत् करोतु, ...................... स्वीकरोमि।

**शाकविक्रेत्री** – पञ्चकिलोमितानि ददामि। गृञ्जनपाकार्थं वाञ्छ्यते किम्?

**सुरभिः** – आम्! बालेभ्यः ...................... बहु रोचते ननु।

**शाकविक्रेत्री** – धन्यवादः। पुनरपि आगच्छतु भवती।

**मञ्जूषा**

| |
|---|
| त्रिंशत्, वैद्या, मूल्यम्, पञ्चकिलोमितानि, गृञ्जनपाकः। |

### 2. अलं विवादेन

**बस-संवाहकः** – भोः! कुत्र गन्तव्यम्? यात्रापत्रं स्वीकरोतु।

**सोमेशः** – द्वे ...................... केन्द्रीयसचिवालयं यावत् ददातु। एतानि पञ्चाशत् ...................... स्वीकरोतु।

**बस-संवाहकः** – एते यात्रापत्रे। परिवर्तं देहि। विंशतिः रूप्यकाणि न सन्ति?

**सोमेशः** – मम समीपे ...................... न अस्ति।

**बस-संवाहकः** – यात्रापत्रम् आनय। तस्य पृष्ठे अवशिष्टं राशिं लिखामि।

**सोमेशः** – अवशिष्टानि रूप्यकाणि कुतः ...................... ?

**बस-संवाहकः** – राजीवचतुष्पथे स्थितात् कार्यालयात् एव प्राप्स्यन्ते।

**सोमेशः** – विचित्रा व्यवस्था। ...................... रूप्यकाणि प्राप्तुं पुनः दशरूप्यकाणां व्ययः समयहानिः च।

**बस-संवाहकः** – अहं किं करवाणि? मम समीपे त्रिंशत् रूप्यकाणि न सन्ति?

**धनेशः** – सोमेश, अलं विवादेन। एतानि विंशतिरूप्यकाणि दीयन्ताम्।

**बस-संवाहकः** – धन्यवादाः। जनतायाः सहयोगः इत्थम् एव सर्वत्र अपेक्षितः।

**मञ्जूषा**

| |
|---|
| त्रिंशत्, रूप्यकाणि, यात्रापत्रे, प्राप्स्यन्ते, परिवर्तः। |

## 3. यातायातनियमानां पालनम्

(नगेन्द्रः द्विचक्रिकया गच्छति।)

**आरक्षकः** – विरम विरम! किं न पश्यसि रक्तविद्युत्सङ्केतम्?

**नगेन्द्रः** – ......................................................................................................।

**आरक्षकः** – विद्यालयं प्रति गन्तव्यम् इति तु समुचितं कारणं नास्ति।

**नगेन्द्रः** – ......................................................................................................।

**आरक्षकः** – परीक्षा अस्ति तर्हि गृहात् दशनिमेषपूर्वम् एव प्रस्थानं करणीयम्।

**नगेन्द्रः** – ......................।

**आरक्षकः** – कथं क्षमे? शीघ्रं शतं रूप्यकाणि प्रयच्छ।

**नगेन्द्रः** – ......................................................................................................।

**आरक्षकः** – बाढम्! गच्छ अधुना। भविष्ये कदापि यातायातनियमानाम् उल्लङ्घनं न करणीयम्। भवतां सुरक्षार्थम् एव एते नियमाः सन्ति।

**नगेन्द्रः** – ......................................................................................................।

**मञ्जूषा**

- किं करोमि? अद्य परीक्षा अस्ति।
- (विलपन्) कृपया क्षम्यताम्। अद्य तु मम समीपे धनं नास्ति।
- क्षम्यताम्। विद्यालयं प्रति गन्तव्यम्। विलम्बः जातः अस्ति।
- उपकृतः अस्मि। भविष्ये कदापि इत्थं न आचरिष्यामि।
- अद्य तावत् क्षम्यताम्।

## 4. आरोग्यं परमं सुखम्

**वैद्यः** – आगच्छ पुत्रि। किं जातम्? ज्वरः अस्ति किम्?

**सुनृता** – ......................................................................................................।

**वैद्यः** – एवम्। ज्वरः न अस्ति। उदरे पीडा वर्तते ह्यः किं भक्षितम्?

**सुनृता** – ......................................................................................................।

**वैद्यः** – अहो! आपणे आलुकस्य पिष्टिकाः खादिताः। किं न जानासि, वर्षर्तौ आपणे खाद्यवस्तूनि न खादितव्यानि। एतत् चूर्णं स्वीकरोतु।

**सुनृता** – ..................................................................................................।

**वैद्यः** – अरे नहि। कटु न अस्ति। पुनरपि औषधिकृते स्वादः न गणनीयः।

**सुनृता** – ....................... ?

**वैद्यः** – दिने त्रिवारम् एकचमसमात्रम् उष्णजलेन ग्रहीतव्यम्।

**सुनृता** – .......................

**वैद्यः** – पुनः आगमनस्य आवश्यकता एव न भविष्यति। स्वास्थ्यं प्रति भविष्ये सावधाना भव। आरोग्यं परमं सुखम्।

**सुनृता** – धन्यवादाः। प्रणमामि।

**मञ्जूषा**

- महोदय! ज्वरः नास्ति, उदरे पीडा अस्ति।
- औषधं दिवसे कतिवारं स्वीकरणीयम्?
- अस्तु, पुनः कदा आगन्तव्यम्?
- अहो चूर्णम्! चूर्णं कटु तु न अस्ति?
- अधिकं किमपि न भक्षितम् आपणे केवलम् आलुकस्य पिष्टिकाः खादिताः।

## 5. परोपकाराय सतां विभूतयः

**सुधाकरः** – नमस्ते। आगच्छतु भवान्। उपविशतु।

**अतिथिः** – उपविशामि तावत्। भवतः पितृमहोदयाः गृहे न सन्ति किम्?

**सुधाकरः** – स तु इदानीम् एव चिकित्सालयम् अगच्छत्।

**अतिथिः** – किमर्थं ....................... अगच्छत्?

**सुधाकरः** – नास्ति विशेषं कारणम्। स प्रतिदिनं रुग्णेभ्यः दुग्धं ....................... तत्र गच्छति।

**अतिथिः** – एवम् ....................... दातुम्! किं प्रतिदिनम् एव?

**सुधाकरः** – आम्! यदा कदा फलानि अपि नयति।

**अतिथिः** – महान् ....................... अस्ति।

**सुधाकरः** – किम् अत्र परोपकारः। एतत् तु अस्माकं कर्तव्यम् एव।

**अतिथिः** – धन्योऽहं यत् एतेषाम् अद्य ....................... भविष्यति।

**सुधाकरः** – नहि, नहि। अद्य दर्शनं न भविष्यति यतः सः ततः एव कार्यालयं प्रति गमिष्यति।

अतिथि: – ........................ कदा गच्छति?

सुधाकर: – प्रतिदिनम् अष्टवादने एव।

अतिथि: – श्व: अष्टवादने एव आगमिष्यामि। कृपया निवेदय 'तस्य बालमित्रं सुरेन्द्र: आगत: आसीत्'।

सुधाकर: – अवश्यमेव कथयिष्यामि। नमस्ते।

**मञ्जूषा**

| दातुम्, परोपकार:, कार्यालयम्, दुग्धम्, चिकित्सालयम्, दर्शनम्। |
|---|

## 6. सदुपयोग:

ऋतिका – तव वस्त्राणि तु अतीव शोभन्ते।

मञ्जुला – ........................................................................................................

ऋतिका – तव पार्श्वे कति परिधानानि सन्ति?

मञ्जुला – बहूनि नूतनपरिधानानि वर्तन्ते मम समीपे तथापि अहं विशेषावसरेषु नवीनपरिधानानां क्रयं करोमि।

ऋतिका – ........................................................................................................

मञ्जुला – अत्र-तत्र यदा-कदा अवसरेषु धारयिष्यामि। तव समीपे कति परिधानानि?

ऋतिका – ........................................................................................................

मञ्जुला – पुस्तकै: किं करिष्यसि?

ऋतिका – पुस्तकानि एव अस्माकं मित्राणि सन्ति। अद्यत्वे दिल्लीनगरे पुस्तकमेलापकं वर्तते। तत्र गत्वा पुस्तकानि एव क्रेष्यामि।

मञ्जुला – ........................................................................................................

ऋतिका – परिधानेभ्य: किं भवति? परिधानानि तु जीवनाय एव सन्ति न तु जीवनं परिधानेभ्य: अस्ति। पुस्तकानि तु आजीवनम् उपकुर्वन्ति।

मञ्जुला – ........................................................................................................

**मञ्जूषा**

- किं पुस्तकै: परिधानस्य स्थानं नीयते?
- किं करिष्यसि एभि: परिधानै: ?
- साधु। एतत् तु मया न चिन्तितम्। अद्य आरभ्य अहम् अपि धनस्य सदुपयोगं पुस्तकेभ्य: एव करिष्यामि न तु परिधानेभ्य:।
- मम समीपे केवलं पञ्च परिधानानि सन्ति। अहं तै: सन्तुष्टा अस्मि। अहं तु पुस्तकप्रिया अस्मि।
- अये! अद्य तु मम जन्मदिवस:, एतत् परिधानं तु मम माता मह्यं क्रीतवती।

## 7. उद्यमः

(सर्वेशः सोमेशः च विद्यालयस्य अल्पाहारगृहे उपविष्टौ। एकादशवर्षीयः मनोजः आगत्य चायपात्राणि स्थापयति।)

**सर्वेशः** – भो! कतिदिनेभ्यः अत्र कार्यं करोषि? पूर्वं तु न दृष्टः?

**मनोजः** – ..............................

**सोमेशः** – एवम्। सप्ताहः जातः! कुतः आगतः?

**मनोजः** – ..............................

**सोमेशः** – अध्ययनं त्यक्त्वा किमर्थं पाटलिपुत्रतः अत्र आगतः?

**मनोजः** – किं करोमि! मन्दभाग्यस्य मम पिता दुष्टैः पूर्वं हतः।
.............................., अनाथः अहं कथं निर्वाहं कुर्याम्?

**सर्वेशः** – अहो! महद्दुःखम्, परं पठनं न वाञ्छसि किम्?

**मनोजः** – ..............................

**सोमेशः** – एवं हतोत्साही मा भव। विद्यालये रात्रौ कक्षा भवति। किमपि पठितं न वा?

**मनोजः** – केवलं द्वितीयकक्षा उत्तीर्णा।

**सर्वेशः** – सायं षड्वादने आगच्छतु। यदि मनोयोगेन पठिष्यसि तर्हि छात्रवृत्तिमपि प्राप्स्यसि।

**मनोजः** – ..............................

**सोमेशः** – सर्वं तव अधीनम् एव। उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।

**मञ्जूषा**

- बहु उपकृतम्। ईश्वरः भवते सर्वां सिद्धिं प्रदास्यति।
- अवश्यम् इच्छामि। परं शिक्षा नास्ति मे भाग्ये।
- श्रीमन्! पाटलिपुत्रतः आगतोऽस्मि।
- श्रीमन्! सप्ताहः एव जातः।
- इदानीं मम माता अपि दिवङ्गता।

## ( ङ) कथापूर्तिः

♦ **अधोलिखिताः कथाः मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत–**

### 1.

पुरा लङ्कायाः नृपः (i) ...................... छलेन सीताम् अहरत्। श्रीरामः (ii) ...................... च ताम् अन्वेष्टुं वने इतस्ततः अभ्रमताम्। वने श्रीरामस्य (iii) ...................... वानरराजेन सुग्रीवेन सह (iv) ...................... । मित्रधर्मं निर्वहन् श्रीरामः (v) ...................... सहायताम् अकरोत् तस्य दुराचारिणं भ्रातरं बालिं च हत्वा किष्किन्धायाः सिंहासनम् अधिष्ठापयत्। सुग्रीवः अपि सीताम् अन्वेष्टुं (vi) ...................... प्रेषितवान्। तेषु परमबुद्धिमान् वीरः च (vii) ...................... अपि आसीत्। सः लङ्कां (viii) ...................... सीताम् अन्विष्टवान्। अन्ते श्रीरामस्य (ix) ...................... सह युद्धम् अभवत्। युद्धे श्रीरामः सर्वान् (x) ...................... लङ्कापतिं रावणं च मारयित्वा सीतां प्राप्तवान्।

**मञ्जूषा**

| |
|---|
| गत्वा, रावणः, राक्षसान्, मित्रता, रावणेन, वानरयूथम्, सुग्रीवस्य, हनुमान्, लक्ष्मणः, अभवत्। |

### 2.

कस्मिंश्चिद् वने एकः वृक्षः आसीत् । तत्र एकः चटकः स्वपरिवारेण सह वसति स्म। वर्षाकाले एकदा तत्र महती (i) ...................... भवति। एकः वानरः आश्रयार्थं (ii) ...................... अधः आगच्छति। वानरं दृष्ट्वा चटकः वदति – "भोः वानर! भवान् तु समर्थः अस्ति। भवतः (iii) ...................... मनुष्य-शरीरम् (iv) ...................... अस्ति। हस्तौ पादौ च सम्यक् सन्ति। भवान् उत्तमगृहस्य (v) ...................... कर्तुं शक्नोति। किमर्थं न स्वस्य कृते गृहस्य निर्माणं करोति?" तत् श्रुत्वा (vi) ...................... कुपितः भवति। वानरः (vii) ...................... वदति – "अधुना त्वं मौनम् एव तिष्ठ। तव (viii) ...................... आवश्यकता नास्ति।" चटकः तं पुनः कथयति – "भ्रातः! अहं तु तव हिताय एव चिन्तयामि।" तस्य (ix) ...................... श्रुत्वा सः वानरः वृक्षम् आरुह्य (x) ...................... नीडं नाशयति। अत एवोच्यते – उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये इति।

**मञ्जूषा**

| |
|---|
| निर्माणम्, इव, चटकस्य, वचनम्, वानरः, वृष्टिः, वृक्षस्य, चटकम्, शरीरम्, उपदेशस्य। |

### 3.

शीतलेन जलेन परिपूर्णः एकः घटः आसीत्। घटम् आच्छादयितुं (i) ...................... उपरि एकः शरावः (आच्छादन-पात्रम्) आसीत्। एकदा (ii) ...................... घटम् अपृच्छत् – मित्र! यत् किमपि (iii) ...................... भवतः समीपम्

आगच्छति, भवान् तत् शीतलेन (iv) ...................... पूरयति । तत् च पात्रं जलं (v) ...................... दूरं गच्छति। यद्यपि अहं सर्वदा (vi) ...................... सह एव तिष्ठामि, परं भवान् मह्यम् एकं (vii) ...................... अपि जलं किमर्थं न ददाति? तदा घटः शरावम् अकथयत् – ''अन्यानि पात्राणि मम (viii) ...................... आगच्छन्ति तानि विनम्रतया शिरः नत्वा जलं याचन्ते, परं भवान् तु सर्वदा मम (ix) ...................... तिष्ठति। तर्हि अहं कथं भवते जलं दातुं शक्नोमि? शिरः नत्वा आगच्छतु (x) ...................... अपि जलेन पूरयिष्यामि'' इति। उक्तम् अपि – ''विनयात् याति पात्रताम्।''

**मञ्जूषा**

| |
|---|
| पात्रम्, भवन्तम्, भवता, घटस्य, शरावः, शिरसि, समीपम्, जलेन, बिन्दुमितम्, स्वीकृत्य । |

**4.**

एकदा केचन शिष्याः (i) ...................... कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् (ii) ...................... आगच्छत्। गजस्य उपरि उपविष्टः (iii) ...................... उच्चस्वरेण पुनः पुनः घोषयति स्म – अपसरन्तु, अपसरन्तु इति। सर्वे (iv) ...................... धावितवन्तः। यथा सर्वेषु वस्तुषु (v) ...................... अस्ति तथा गजे अपि इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्। तावति काले गजः तं (vi) ...................... गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्च्छितं तं गुरुकुलम् अनयन्। (vii) ...................... तं गुरुः अपृच्छत् – ''वत्स! त्वम् एवं किमर्थम् आचरः इति।'' शिष्यः अवदत् – ''गुरुवर्य! भवद्भिः एव (viii) ...................... यत् ईश्वरः सर्वेषु अस्ति, अतः अहम् गजे अपि ईश्वरं मत्वा तत्र (ix) ...................... इति।'' गुरुः उक्तवान् – ''वत्स! यथा गजे तथा हस्तिपके अपि ईश्वरः इति (x) ...................... न चिन्तितम् इति।''

**मञ्जूषा**

| |
|---|
| हस्तिपकः, लब्धसंज्ञम्, कथम्, शिक्षितम्, भिक्षाटनम्, अतिष्ठम्, शिष्याः, ईश्वरः, स्वशुण्डेन, मार्गे। |

**5.**

एकदा (i) ...................... भगवान् सूर्यः (ii) ...................... प्रति गन्तुम् (iii) ...................... आसीत्। परं लोकव्यवहारविषये (iv) ...................... सः व्याकुलः अभवत्। सूर्यः अचिन्तयत् – ''मयि अस्तगते (v) ...................... संसारः अन्धकारे (vi) ...................... भविष्यति। लोकानां (vii) ...................... कथं चलिष्यति? मां विना सर्वे जीवाः (viii) ...................... अनुभविष्यति सूर्यस्य चिन्तायाः भावं विज्ञाय एकः (ix) ...................... उपस्थितः भूत्वा सविनयं निवेदितवान् – ''भगवन्! अलं चिन्तया। यद्यपि मम प्रकाशः न्यूनः अस्ति तथापि जनानां (x) ...................... अहं यथाशक्ति स्वजीवनं समर्पयिष्यामि, कार्याणि च साधयिष्यामि।''

**मञ्जूषा**

| |
|---|
| विचिन्त्य, व्यवहारः, दुःखम्, सेवायाम्, सायङ्काले, लघुदीपः, उद्यतः, सम्पूर्णः, अस्ताचलम्, निमग्नः। |

## 6.

एकदा महात्मा गान्धिः पत्राणि (i) ........................ । सहसा मसीपात्रे (i) ........................ समाप्ता अभवत्। तत्रैव लेखनीं परित्यज्य सः कार्यविशात् बहिः (iii) ........................ । पुनः यदा आगतः, लेखितुम् इतस्ततः (iv) ........................ परन्तु लेखनी कुत्रापि न आसीत्। सः कर्मचारिणं (v) ........................ । कर्मचारी अवदत् – ''सा तु मया बहिः (vi) ........................ । भवान् नूतनां लेखनीं स्वीकरोतु इति।'' महात्मागाधिः प्रत्यवदत् – ''तस्याम् एव मसीं पूरय। देशस्य धनम् अमूल्यम् (vii) ........................ । क्षुद्रातिक्षुद्रम् अपि वस्तु न क्षेपणीयम्।' एवम् उक्त्वा सः स्वयं बहिः गत्वा लेखनीम् अन्विष्य (viii) ........................ । तस्यां मसीम् (ix) ........................ तया एव लेखनकार्यं (x) ........................ ।

**मञ्जूषा**

| |
|---|
| आनीतवान्, प्रारब्धवान्, लिखति स्म, अस्ति, अपूरयत्, क्षिप्ता, पृष्टवान्, दृष्टवान्, गतवान्, मसी। |

## 7.

एकः बालकः (i) ........................ । तस्य नाम आलः आसीत्। एकदा सः (ii) ........................ अपृच्छत् – 'मातः! मूर्खः कः भवति? माता (iii) ........................ 'यः बुद्धिहीनः स एव मूर्खः भवति।' एतच्छ्रुत्वा सः बालकः (iv) ........................अभवत् अकथयत् च – 'तदा अहं (v) ........................ अस्मि, यतोहि विद्यालये सर्वे मां मूर्खः। इति कथयन्ति। अधुना अहं विद्यालयं न गमिष्यामि। माता तम् अवबोधयत् – ''पुत्र! निराशः मा भव। त्वं मूर्खः नासि। अहं त्वां बुद्धिमन्तं (vi) ........................ ।''

माता बालकं प्रतिदिनम् अपाठयत्। सः बालकः अपि (vii) ........................ अपठत् मातुः सेवां च अकरोत्। एकस्मिन् दिवसे सः महान् (viii) ................................ अभवत्। ''तस्य नाम थामस अल्वा एडीसन'' आसीत्। विद्युद्-दीपकः, ग्रामोफोन-यन्त्रम्, चलचित्रयन्त्रम् आदीनि (ix) ........................ अस्य एव महावैज्ञानिकस्य आविष्काराः सन्ति। एषः महान् वैज्ञानिकः अकथयत् – ''मम माता एव मम मार्गदर्शिका (x) ........................ च अस्ति।''

**मञ्जूषा**

| |
|---|
| बुद्धिहीनः, खिन्नः, शिक्षिका, वैज्ञानिकः, आसीत्, परिश्रमेण, मातरम्, वस्तूनि, अवदत्, करिष्यामि । |